सा स्वार्थेति स्वसमभिव्याहृतपदोपस्थाप्यतावच्छेदकधर्मावच्छिन्नविषयतानिरूपितस्वार्थभेदान्वयितावच्छेदकावच्छिन्नोद्देश्यतानिरूपिता भेदसंसर्गावच्छिन्नावच्छेदकतावच्छेदकत्वेन जिज्ञासितो यो स्वार्थभेदान्वयितावच्छेदकधर्मन्यूनवृत्तिधर्मस्तद्वान् किंपदार्थः को ब्राह्मण इत्यादौ च पाककृतित्वावच्छिन्नविधेयतानिरूपितब्राह्मणत्वावच्छिन्नोद्देश्यतानिरूपिताभेदसंसर्गावच्छिन्नावच्छेदकत्वेन जिज्ञासितो यो ब्राह्मणत्वन्यूनवृत्तिधर्मस्तद्वद्भिन्नब्राह्मणः पचतीति बोधः पाककृतित्वावच्छिन्नविधेयतानिरूपितब्राह्मणत्वावच्छिन्नोद्देश्यतानिरूपिताभेदसंसर्गावच्छि-

पितावच्छेदकत्वोपलक्षितधर्मन्यूनवृत्तित्वमपि धर्मांशे विशेषणं देयम् अतः को ब्राह्मणः पचतीत्यादिप्रश्नानन्तरं चैत्रः पचतीत्यादिकमुत्तरवाक्यं प्रयुज्यते न तु मनुष्यः पचतीत्यादिकं मनुष्यत्वादेर्ब्राह्मणत्वाद्यन्यूनवृत्तित्वात् तदवच्छिन्नोद्देश्यकत्वेन ज्ञानविषयेच्छायास्तत्राप्रतीतेः एवं यत्रोद्देश्यतावच्छेदके किंपदार्थस्याभेदेनान्वयस्तत्र तदन्वयितावच्छेदकधर्मावच्छिन्नविशेषणतापन्नतदन्वयितावच्छेदकधर्मन्यूनवृत्तिधर्मावच्छिन्नोद्देश्यतावच्छेदकताकप्रकृतज्ञानगोचरेच्छा किंपदेन बोध्यते ऽतः कति घटाः सन्तीत्यादौ इतिप्रत्ययार्थे संख्यादौ किंपदार्थस्य जिज्ञासितधर्मावच्छिन्नस्याभेदेनान्वयात् संख्या

न्नकिंचिद्धर्मावच्छिन्नावच्छेदकताशालि ज्ञानं भवत्विति जिज्ञासा तदन्वयितावच्छेदके तिङ्किंपदार्थान्वयितावच्छेदकं प्रकृते संख्यात्वादि तद्वच्छिन्नविशेषणतापन्नकिंपदार्थान्वयितावच्छेदकसंख्यात्वादिन्यूनवृत्तिधर्मो दशत्वादिस्तद्वच्छिन्नोद्देश्यतावच्छेदकताकेत्यर्थः एवं च पूर्ववद्विधेयतानिवेश्य तन्निरूपितताद्दशधर्मावच्छिन्नान्वयितावच्छेदकावच्छिन्नोद्देश्यतानिरूपिताभेदसंसर्गावच्छिन्नावच्छेदकतानिरूपित

स्वार्थभेदान्वयितावच्छेदकधर्मावच्छिन्नावच्छेदकत्वेनजिज्ञासितो यः स्वार्थभेदान्वयितावच्छेदकन्यूनवृत्तिधर्मस्तदवच्छिन्नेकिंपदस्यशक्तेर्बो
धोपयोगित्वं तदर्थमाह एवंचेति सत्तानिष्ठेति एतद्देशवृत्तित्वावच्छिन्नेत्यर्थः घटवृत्तीति घटत्वावच्छिन्नेत्यर्थः प्रथमावच्छेदकताऽभेदसंसर्गावच्छि
न्नाबोध्यासंख्यात्वेत्यादेः संख्यात्वावच्छिन्नावच्छेदकतावच्छेदकत्वेन जिज्ञासितः संख्यात्वन्यूनवृत्तिधर्म इत्यर्थः संख्यात्वावच्छेदकतायांनिरूपि
तां तार्थान्वयः अन्वयादिति एतद्देशवृत्तित्वत्वावच्छिन्नविधेयतानिरूपितघटत्वावच्छिन्नोद्देश्यतानिरूपिताभेदसंसर्गावच्छिन्नावच्छेदकतानिरू
पितसंख्यात्वावच्छिन्नावच्छेदकतावच्छेदकत्वेनजिज्ञासितो यः संख्यात्वन्यूनवृत्तिधर्मस्तद्दभिन्नसंख्यावदभिन्नाघटा एतद्देशवृत्तय इति बोधः

त्वन्यूनवृत्तिदशत्वत्वाद्यवच्छिन्नोद्देश्यतावच्छेदकताकबोधजनकंदशसंख्याकाघटाःसंतीत्युत्तरं तत्र प्रयुज्यते यत्रोद्देश्य
तावच्छेदकीभूतविभक्त्याद्यर्थभेदेन किंपदार्थान्वयः कस्यपुत्रः सुंदर इत्यादौ तत्र यादृशसंबंधेन यदवच्छिन्ने तदन्वयस्तत्र

तादृशसंख्यात्वावच्छिन्नकिंचिद्धर्मावच्छिन्नावच्छेदकताशालिज्ञानं भवत्विति जिज्ञासा दशसंख्याका इति यदि दश घटाः संतीत्युत्तरं प्रयुज्यते तत्रापि
दशत्वस्य दशसंख्याकान्वयित्वेन स्वार्थभानात् अन्येतु दशघटाः संतीत्यादि संख्याख्याविषयकोत्तरानुरोधात्तादृशसंख्यानिष्ठकिंचिद्धर्मावच्छिन्ना
वच्छेदकता शालिज्ञानं भव तिजिज्ञासादिकं अत एव संख्याग्रंथे संख्यात्वव्याप्यं दशत्वत्वादिकं जातिः कति भवतः पुत्रा इति प्रश्ने दशेत्यु
त्तरमित्युक्तमित्याहुः न्यूनवृत्तित्वोपादानात्स संख्याका घटा इत्यादि नोत्तरं कस्येति यत्तत्पदे विभक्त्यर्थतावच्छेदकपदे अत्र सुंदरत्वावच्छिन्न
विधेयतानिरूपितं पुत्रत्वावच्छिन्नोद्देश्यतानिरूपितसंबंधत्वावच्छिन्नावच्छेदकतानिरूपितनिरूपितत्वसंबंधावच्छिन्नकिंचिद्धर्मावच्छिन्ना

वच्छेदकताशालि ज्ञानं भवत्विति इच्छेत्यतस्तथाविधनिरूपितत्वसंबंधावच्छिन्नावच्छेदकतावच्छेदकत्वेन जिज्ञासितो यः पुत्रानुयोगिकाश्रयत्वप्रतियोगिजन्यत्वानुयोगिकनिरूपितत्वसंबंधप्रतियोगित्वस्य विशेषधर्मस्तद्भिन्निरूपितसंबंधवत्पुत्रः सुंदर इति बोधः विधेयतात्वं निवेश्य तन्निरूपितस्वरूपस्वसमभिव्याहृतपदोपस्थाप्यान्वयितावच्छेदकधर्मावच्छिन्नोद्देश्यतानिरूपितस्वार्थभेदान्वयितावच्छेदकधर्मावच्छिन्नावच्छेदकतानिरूपितस्वार्थभेदसंबंधावच्छिन्नावच्छेदकतावच्छेदकत्वेन जिज्ञासितो यः स्वसमभिव्याहृतपदोपस्थाप्यान्वयिनिष्ठान्वयप्रतियोगिकस्वार्थान्वयितावच्छेदकावच्छिन्नानुयोगिका

तादृशसंबंधेन विशेषधर्मावच्छिन्नविशेषिततद्वच्छिन्ननिष्ठोद्देश्यतावच्छेदकतावच्छेदकताकप्रकृतविधेयज्ञानगोचरेच्छा प्रतीयते एवं विधेयवाचककिंपदस्य स्वसमभिव्याहृतपदोपस्थाप्यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नोद्देश्यतानिरूपितविधेयतावच्छेदकतया जिज्ञासितो यो विशेषधर्मस्तद्वच्छिन्ने शक्तिरित्ययं कइत्यादौ इदंत्वावच्छिन्नांशे विधेयतावच्छेदकत्वेन जिज्ञासितधर्मवानित्याकारकोऽन्वयबोधः तेन तद्विषयकजिज्ञासाजनकज्ञानजनकं चायं ब्राह्मण इत्याद्युत्तरवाक्यं तादृशप्रश्नानंतरं प्रयु

न्वयप्रतियोगित्वस्य विशेषधर्मः तद्वति किंपदशक्तिः विशेषधर्मपदात्मके यस्य सुंदर इति नोत्तरं मनुष्यस्य सुंदर इति तूत्तरं भवत्येव विशेषधर्म इति समभिव्याहृतपदोपस्थाप्यतावच्छेदकीभूतोद्देश्यतावच्छेदकन्यूनवृत्तिरित्यर्थः इदंत्वं च ब्राह्मणतदन्यवृत्तितया सामान्यधर्मः इदंत्वावच्छिन्नोद्देश्यतानिरूपितकिंचिद्धर्मावच्छिन्नावच्छेदकताशालिज्ञानं भवत्विति जिज्ञासा इदं किमित्युद्देश्यतात्वं निवेश्य तन्निरूपितस्वार्थभेदान्वयितावच्छेदकावच्छिन्नविधेयतानिरूपिताभेदसंबंधावच्छिन्नावच्छेदकतावच्छेदकत्वेन जिज्ञासितो यः स्वार्थाभेदान्वयितावच्छेदकस्य विशेषधर्मस्तद्वच्छि

शं०वा० न्नेकिंपदशक्तिः इदंत्वावच्छिन्नोद्देश्यतानिरूपितद्रव्यत्वावच्छिन्नविधेयतानिरूपिताभेदसंसर्गावच्छिन्नावच्छेदकतावच्छेदकत्वेन जिज्ञासितो योद्रव्यत्व क्रं०टी
५० स्य विशेषधर्मस्तद्वद्भिन्न द्रव्याभिन्नमिदमिति बोधः तादृशाभेदसंसर्गावच्छिन्नकिंचिद्धर्मावच्छिन्नावच्छेदकताशालिज्ञानं भवत्विति जिज्ञासा किंध
नमिति केचित्तु कस्य धनमिति षष्ठीसमासः किमीयत्वत्वा वच्छिन्नो लक्षणया किंपदार्थः इदंत्वावच्छिन्नविशेष्यता निरूपितधनत्वावच्छिन्नविधेयता
निरूपितभेदसंबंधावच्छिन्नावच्छेदकतावच्छेदकतायाः संबंधित्वनिष्ठायानिरूपितत्वसंबंधेनावच्छेदकतायामवच्छेदकतया जिज्ञासितो यः स्वामित्व
न्यूनवृत्तिधर्मः तद्वतो धनमिति बोधः जिज्ञासादिकं तुल्यमिति पूर्वोदाहरणादिशेषमाहुः तर्हि कस्य पुत्र इत्येतदनंतरं एतत्पाठ उचित इति भवत इति उद्दे

श्यते एवं यत्र विधेये विधेयतावच्छेदके वा किंपदार्थस्याभेदेन भेदेन वान्वयः इदं किं इदं किं धनं भवतः कति पुत्राः भवान्कस्य पु
त्र इत्यादौ रीतिः पूर्ववदूहनीया किमिंदुः किंपद्मं किमु मुकुरबिंबं किमु मुखं किमब्जे किं मीनौ किमु मदनबाणौ किमु दृशौ खगौ वा
गुच्छौ वा कनककलशौ वा किमु कुचौ तडित्तारा वा कनकलतिका वा किमबले सादावव्यय किमो वा शब्दस्य वितर्कोर्थः

श्यतां तन्निवेश्यतन्निरूपितविधेयतानिरूपितस्वार्थाभेदान्वयितावच्छेदकधर्मावच्छिन्नावच्छेदकतावच्छेदकत्वेन जिज्ञासितो यः स्वार्थाभेदान्वयि
तावच्छेदकस्य विशेष्यधर्मस्तद्वतिशक्तिः भवत्पुत्रत्वावच्छिन्नोद्देश्यतानिरूपितविधेयतानिरूपितसंख्यात्वावच्छिन्नकिंचिद्धर्मावच्छिन्नावच्छेदक
तावच्छेदकत्वेन जिज्ञासितो यः संख्यात्वस्य विशेषधर्मस्तद्वद्भिन्नसंख्यावद्भिन्ना भवदीयपुत्रा इत्यन्वयबोधः तादृशसंख्यात्वावच्छिन्नकिंचि
द्धर्मावच्छिन्नावच्छेदकताशालिज्ञानं भवत्विति जिज्ञासा भवानिति तथाविधोद्देश्यतानिरूपितस्वार्थाभेदान्वयितावच्छेदकावच्छिन्नान्वयिताव

च्छेदकावच्छिन्नविधेयतानिरूपितस्वार्थभेदान्वयितावच्छेदकावच्छिन्नावच्छेदकतानिरूपितभेदसंबंधावच्छिन्नावच्छेदकतावच्छेदकत्वेनजि
ज्ञासितोयः स्वार्थभेदान्वयितावच्छेदकावच्छिन्नान्वयितावच्छेदकावच्छिन्नानुयोगिताकान्वयप्रतियोगिस्वार्थभेदान्वयितावच्छेदकावच्छिन्नान्व
यिताकान्वयप्रतियोगित्वस्य विशेषधर्मस्तद्वृत्तिकिंपदशक्तिः भवत्वावच्छिन्नोद्देश्यतानिरूपितपुत्रत्वावच्छिन्नविधेयतानिरूपितजन्यत्वत्वाव
च्छिन्नावच्छेदकतानिरूपितनिरूपितत्वसंबंधावच्छिन्नावच्छेदकतावच्छेदकत्वेन जिज्ञासितोयः पुत्रत्वावच्छिन्नानुयोगिताकाश्रयत्वसंबंधप्रति

वितर्कश्चेत्प्रयोक्तुः संभावनात्मकं ज्ञानं तदर्थस्य च विशेष्यतासंबंधेन प्रथमांतपदोपस्थाप्यविशेष्ये प्रकारितासंबंधेन तत्र च वि
शेषणस्य च द्वाद्वेरन्वयः नामार्थनाव्ययार्थस्य भेदान्वयेऽविरोधात् यत्र विशेषणवाचकमपि प्रथमांतं तत्राभेदसंबंधावच्छिन्न
प्रकारितासंसर्गः यत्र तु प्रकृतार्थस्य विशेष्यतया स्वार्थबोधकं विभक्त्यंतं तत्र किंपदात्सत्वे तादृशविभक्त्यंतसमुदायार्थस्य वि
शेष्ये यादृशसंबंधेनान्वयस्तादृशसंबंधावच्छिन्नप्रकारितैव तादृशार्थस्य किंपदार्थे संसर्गोऽतः किमिंदुरित्यादावभेदेन चंद्रादि

योगिताजन्यत्वानुयोगिकनिरूपितत्वसंसंबंधप्रतियोगित्वस्य विशेषधर्मस्तद्वन्निरूपितजन्यतावत्पुत्राभिन्नो भवानिति बोधः तादृशनिरूपितत्वसंसर्गा
वच्छिन्नकिंचिद्धर्मावच्छिन्नावच्छेदकताशालि ज्ञानं भवत्विति जिज्ञासा किंपद्ममिति पाठः तदर्थस्य तत्र संभावनायां किमिंदुरिति किमिंदुः किंपद्ममि
ति मूलोक्तपद्ये तु एकस्यामनेकस्यां वेंद्वादिसंभावनायां मुखस्य विशेष्यता चरमं च किंपदं वाक्यालंकारे अथवा तत्रेंद्वादिप्रकारकेव मुखविशेष्यकासंभा
वना मुखविशेष्यतया बोधे भासते एनां च निश्चयांते संभावनां व्यपदिशंति दोषविशेषजन्यतया विशेष्यवृत्त्यसाधारणधर्मभानं तत्प्रयोजके तिपूर्णचं

शा०वा० इवदनारजनी किंवा विशालनयनाहरिणी किं॥ मंदमत्तगमनाकारिणी किं पश्य गच्छति सखे तरुणी किमित्यादावुपात्तसाधर्म्यप्रतीतिः शाब्देऽपि बोध्या शक्ति का०टी०
५२ परिच्छेदः॥ शक्तिग्रहः॥ अभिसंधिः॥ तात्पर्यं तच्छब्दजेति तदपेक्षाया उपगमे यत्पदजन्यप्रतीतेः तत्पदशक्तिग्रहेऽपेक्षायामन्योन्याश्रय इति भावः अत एव प्रक्रम्य

प्रकारिकाधनमिदं किं चैत्रस्येत्यादावाश्रयत्वादिसंबंधेन चैत्रस्वत्वादिप्रकारिकासंभावना नियमतः प्रतीयते किमिंदुरित्यादौ सं
भावनाबोधोत्तरं तत्प्रयोजकाह्लादकत्वादिप्रतीतिः स्वार्थी कुत्सार्थकमपि क्वचित्किंपदं यथा किं गौरित्यादौ तत्पदप्रतिपाद्यतया
वक्तृबुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने यत्पदस्य शक्तिः अत एव यत्पदेनार्थप्रत्यायने नियमतस्तत्पदापेक्षा त
त्पदसमभिव्याहारज्ञानं विनानुगमकधर्माग्रहेण शक्तिपरिच्छेदस्यैवासंभवात् तच्छब्दजन्यप्रतीतिपूर्वमपि तत्प्रतिपाद्यतयाव
क्तुरभिसंधिः प्रकरणादिना सुग्रह एवेति न तच्छब्दजप्रतीतेर्यत्पदशक्तिग्रहेऽपेक्षा इयं च व्युत्पत्तिः प्रक्रम्यमाणपरामर्शकयच्छब्द
स्य चैत्रः समागतो यस्तत्रावलोकित इत्यादौ चैत्रादिपदेनाप्युपस्थापितस्य यच्छब्देन बोधनात् अत एव साधु चंद्रमसि पुष्करैः
कृतं मीलितं यदभिरामताधिके इत्यादौ तत्पदासत्त्वेऽपि न दोषः पूर्वप्रक्रांत
स्यैव कृतपदोपस्थापितव्यापारस्याभेदेन मीलनान्वयितया यच्छब्देन बोधनात् एवं यं सर्वशैला।

माणपरामर्शकयच्छब्देनार्थप्रत्यायन एव तच्छब्दापेक्षणादेव॥ अधिके इति उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनरिति पश्चार्धं॥ तत्पदासत्त्वेऽपीति राम
प्रक्रांतपरामर्शीयं यच्छब्दस्य ले इत्यादिः अभेदेनेति साधुकरणाभिन्नं मीलनमिति बोधात् यमिति यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दो ५२

हदक्षे भास्वंतिरत्नानि महौषधींश्च पृथूपदिष्टां दुदुहुर्धरित्री पूर्वेति पूर्वप्रयुक्तपदोपस्थाप्यत्वेन यात्प्रयोजकवक्तृबुद्धिः तद्विषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नार्थीत्यर्थः आद्ये तदर्थज्ञानं ततस्तदर्थप्रत्यायनेच्छा ततस्तदर्थबोधकपदप्रयोग इति बुद्धेः स्वप्रयोजकत्वं तादृशि तदन्वये शुद्धिमतिप्रसूतः शुद्धिमत्तरः

इत्यादावपि तदनुरोधेन पूर्वप्रयुक्तपदोपस्थापितेपितस्य शक्त्यंतरं स्वीकरणीयं अतिप्रसंगश्च स्वप्रयोजकबुद्धिस्थत्वमंतर्भाव्य वारणीयः एवं यत्पदोपस्थाप्ये तत्पदशक्तिर्बोध्या अत एव प्रक्रम्यमाणपरामर्शकतच्छब्देनापि नियमतो यत्पदमपेक्ष्यते तमानयय इहास्तीत्यादाविव तमानय घट इहास्तीत्यादितो घटानयनादिप्रतीतेरनुभवविरुद्धत्वात् प्रक्रांतपरामर्शकस्य न तदपेक्षानियमः तदन्वये शुद्धिमतिप्रसूतः शुद्धिमत्तरः दिलीप इति राजेंदुरिंदुः क्षीरनिधाविवेत्यादौ वैवस्वतादिपदोपस्थापितस्य तच्छब्देनापि परामर्शात् तदनुरोधेन पूर्वोपस्थितेपितस्य शक्त्यंतरं स्वीकार्यं उपस्थितिश्च स्वविशेष्यकवृत्तिज्ञानाधीना ग्राह्याऽतः पशुरस्ति तं पश्येत्यादौ पश्वादिपदोपस्थापितलोमादीनां तदादिपदेन न परामर्शः प्रसिद्धार्थकमपि तत्पदं यथा कला च सा कांतिमती कलावत इत्यादौ इदमेतदोः प्रत्यक्षबुद्धिविषये अदसः परोक्षबुद्धिविषये शक्तिः स्वपदस्य समभिव्याहृतपदोपस्थाप्ये शक्तिः समभिव्याहारश्चात्रैकवाक्यघटकत्वं अथैवं चैत्रः स्वपुत्रं पश्यतीत्यादाविव स्वं चैत्रः पुत्रः

दिलीप इति राजेंदुरिंदुः क्षीरनिधाविवेति वैवस्वतादीति यत्पदानुपस्थाप्यापीत्यादिः पूर्वेति पूर्ववत् उपस्थितिश्चेति यत्पदशक्तावपि इदं बोध्यं कला चेति गतं ह्वयं संप्रतिशोचनीयतां समागमप्रार्थनया कपालिनः कला च सा कांतिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदीति चैत्रेति नेष्टापत्तिः तात्पर्यसत्वे

तथानुभवात् अवांतरेति स्वपुत्रकर्मकदर्शनाश्रयश्चैत्र इत्याकारके स्वार्थः स्वार्थस्य स्वपदार्थस्य साक्षादिति स्वाधिकरणवृत्तिसाध्याभाववको धूम इत्या

दौ वारणमपीति तत्रसमभिव्याहृतावलोकनक्रियान्वयितृतीयार्थकृतौ चैत्रस्य साक्षादन्वयादिति भावः आद्ये चैत्रेणेति द्वितीये चैत्रः स्वपुत्रमिति एवं

पश्यति चैत्रभ्राता वा स्वपुत्रं पश्यतीत्यादौ कथं न स्वपदेन चैत्रः प्रत्याय्यते मुख्यविशेष्यवाचकताव्युत्पत्त्युपगमे स्वपुत्रदर्शिनं चैत्रं मैत्रः पश्यतीत्यादौ चैत्रपुत्रबोधानुपपत्तिः न च तत्रावांतरवाक्यार्थबोधे चैत्रस्य मुख्यविशेष्यतया नेयमनुपपत्तिरिति वाच्यं अवांतरवाक्यार्थधियमंतरेणाहत्यैव विशेष्यविशेषणमितिरीत्या महावाक्यार्थबोधे यत्र तात्पर्यं तत्रैव तदनुपपत्तेर्दुर्वारत्वात् न च स्वार्थस्य साक्षात्परंपरया वा यदर्थविशेषणत्वं तादृशार्थवाचकताव्युत्पत्त्या नायं दोष इति वाच्यं एवमपि स्वपुत्रं चैत्रेण दृश्यत इत्यादौ चैत्रपुत्रबोधानुपपत्तेः समभिव्याहृतक्रियान्वयिवाचकत्वमपि न विचारसहं परंपरया क्रियान्वयित्वस्य चैत्रभ्राता स्वं पश्यतीत्यादौ चैत्रादिसाधारणत्वात् साक्षात्क्रियान्वयित्वस्य चैत्रः स्वं पश्यतीत्यादावप्यभावात् क्रियान्वयिप्रत्ययार्थे साक्षादन्वयित्वविवक्षणान्न दोष इति चेदेवमपि स्वव्यापकवह्निसमानाधिकरणधूमवान्पर्वत इत्यादौ स्वपदेन धूमादिपरामर्शानुपपत्तिवारणमशक्यमेव एवं चैत्रेणानीतं स्वपुत्रं मैत्रः पश्यतीत्यादौ चैत्रपुत्रबोधापत्तिवारणमपि न च स्वपदार्थो यदर्थघटितविशेषणस्य विशेष्यतावच्छेदककोटौ यदर्थस्य विशेषणकोटौ वा निविशते स एव पदार्थः स्वशब्दवाच्यः चैत्रपुत्रः

स्वव्यापकवह्निसमानाधिकरणधूमवानित्यत्रापि धूमपदार्थस्य विशेषणकोटौ स्वपदार्थो निविष्ट इति धूमः स्वपदवाच्यः ननु स्वपुत्रदर्शिचैत्रधनमि

त्यादौ चैत्रसंबंधिनएवपदार्थतया चैत्रस्यापदार्थत्वात्स्वशब्दश क्यत्वानुपपत्तिरित्यतआह स्वपुत्रदर्शीति चैत्रस्येति चैत्रसंबंधवद्वृत्तिकर्तृकदर्श
नविषयः स्वपुत्रइतिबोधः तत्रचैत्रपदार्थघटितविषयत्वरूपविशेषणविशेष्यतावच्छेदककोटौ स्वपदार्थनिवेशादितिभावः साक्षादितिपूर्ववं

स्वंपश्यतीत्यादौ चैत्रभ्राता स्वपुत्रंपश्यतीत्यादौ च स्वपदार्थश्चैत्रस्य विशेषणकोटौ चैत्रघटितार्थस्य धर्मितावच्छेदककोटौ
वानिविशतइतिनातिप्रसंगः चैत्रेणावलोकितेस्वपुत्रंमैत्रः पश्यतीत्यादौ चैत्रपदस्य चैत्रकर्तृकेलक्षणया चैत्रः पदार्थैक
देशोनतुपदार्थइतिस्वपदान्नतत्प्रतीतिः चैत्रेणावलोकितमित्यादौ तु तात्पर्यसत्वेऽप्यतएवतत्प्रतीतिः स्वपुत्रदर्शी चैत्रधन
मित्यादौ चैत्रपुत्रदर्शि चैत्रसंबंधित्वाद्यवच्छिन्ने चैत्रे तस्य वाक्ये लक्षणाविरहात् पूर्वभागपरित्यज्यता रशलक्ष्यार्थपरस्य
केवलचैत्रादिपदस्यैवतत्र लक्षणाततएव चैत्रपुत्रादिप्रतीत्युपपत्तिरितिवाच्यं एवंसति चैत्रस्य भ्राता स्वपुत्रो दृश्यतइ
त्यादौ स्वपदेन चैत्रादिप्रतीत्यापत्तेर्दुर्वारत्वात् मैवं साक्षात्परंपरयावा यः स्वार्थस्य विशेष्यः यश्च समभिव्याहृतक्रियाकारक
पदार्थस्तदुभयत्र स्वपदस्य शक्तिः स्वव्यापकवह्निसामानाधिकरण्यं धूमइत्यादावस्तीति क्रियाध्याहाराद्धूमपदस्यसमभि
व्याहृतक्रियाकारकपदत्वमक्षतमेवेति न स्वशब्दात्तत्प्रतीत्यनुपपत्तिः एवंकलशोनिजहेतुदंडजइत्यादावप्यस्तीतिक्रिया

तु परंपरयेति चैत्रः स्वपुत्रंपश्यतीत्यादौ प्रथमायाआकारत्वादितिभावः अंशक्तिरथ्यावश्यकी स्वव्यापकेत्यादौ धूमेतदधिकरणवृत्तित्वव्याप्यवृ
त्तिध्वंसप्रतियोगिताकसमयेत्यादौ बहुव्रीह्यर्थतद्घटकाभिन्नसमये चपरंपरया स्वार्थो विशेषणं यश्चेत्यादि चैत्रेण स्वपुत्रो दृश्यते इत्यादौ स्व

चैत्रपुत्रः पश्यति चैत्रभ्राता स्वपुत्रं पश्यति चैत्रस्य भ्राता स्वपुत्रो दृश्यते इत्यादौ न चैत्रस्य स्वशब्दशक्यत्वप्रसंगः चैत्रस्यार्थप्रत्ययविशेष्यत्वात् प्रकृत
क्रियां प्रत्याकारकत्वाच्चेति भावः नन्वेवं कलशे निजहेत्वित्यत्र स्वशब्दपर्यायनिजपदात्कलशबोधानुपपत्तिः तस्य निजपदार्थप्रत्ययविशेष्यत्वात् प्र
कृतक्रियाभावाच्चेत्यत आह कलशे इति सत दुग्धकुचौ भवत्स्वमा   दिक्षूत्तराद्यैश्च चक्रवाकाः प्रवाहे संतीति रूढिः न प्रयोगा इति

ध्याहारात्स्वपर्यायनिजपदात्कलशादिप्रतीतिः स्वव्यापकवह्निसामानाधिकरण्यं धूमस्येत्यादयश्च न प्रयोगाः इदं तु न तत्त्वं यद्रू
पेण समभिव्याहृतपदादुपस्थितिस्तद्रूपावच्छिन्नस्य स्वपदार्थत्वे एकेन ब्राह्मणेन ब्राह्मणान्तरपुत्रदर्शनदशायां ब्राह्मणः स्वपुत्रं
न पश्यतीति प्रयोगानुपपत्तिः अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकाभावस्य विशेष्ये बाधात्समभिव्याहृतपदार्थनिष्ठ
तत्तद्व्यक्तित्वावच्छिन्नस्य तदर्थत्वेपि वह्निकालीनद्रव्यवति ह्रदादौ स्वव्यापकवह्निकालीनं द्रव्यं नास्तीति प्रयोगानुपपत्तिः
तत्र द्रव्यपदस्यापि लक्षणया तत्तद्व्यक्तित्वावच्छिन्नपरत्वे महानसादावपि तथाप्रयोगापत्तिः तथाविधयत्किंचिद्व्यक्त्यभाव
स्य तत्राबाधात् तादृशसमभिव्याहृतस्थले यद्यद्व्यक्तिव्यापकता वह्नेस्तत्तद्व्यक्तित्वावच्छिन्नाभावकूट एव तत्र नियमतः
प्रतीयत इति चेन्न तथाविधसकलतद्व्यक्तिनिष्ठतत्तद्व्यक्तित्वादीनां युगसहस्रेणापि ज्ञातुमशक्यत्वात् कदाचित्कस्यचिज्ज्ञा

धूमस्याकारकत्वे न स्वपदाशक्यत्वादिति भावः कदाचिदिति एकमात्रवृत्तित्वादिनाऽदुरुपगमत्वादिति तथा च महानससामान्यमात्रवृत्तितद्व्यक्तित्वा
वच्छिन्नोपस्थितिदशायां महानसादावपि तथा प्रतीत्यापत्तिरिति भावः दुरपह्नवत्वादिति पाठे अंगीकार्य तयेत्यत्र च्छेदः तथा चोक्तदूषणं दुर्वार

मिति भावः कुत इत्यत आह तादृशीति योऽयं ब्राह्मणं तत्पुत्रदर्शनदशायामपि ब्राह्मणः स्वपुत्रं पश्यतीति प्रयोगवारणाय स्वनिरूपके स्वादियदान्यः ब्राह्मणपुत्रं पश्य
ति न तु ब्राह्मणस्तदा तादृशप्रयोगवारणाय स्वाश्रयत्वनिवेशः एवमेवक्तौ भार्यामुपेयादित्यादौ स्वपदं विनापि भार्यागमनकर्तृत्वस्य स्वाश्रयत्वघटकभार्यात्वनिरू
पकत्वोभयसंबंधेनान्वय इति बोध्यं कैवल्यघटकत्वेनेति क्वचित्पाठः उक्तदिशेति स्वार्थभेदान्वयितावच्छेदकोद्देश्यतावच्छेदकावच्छिन्नविशेषणत्वोपल

न संभवेपि कतिपयतत्तद्व्यक्तित्वावच्छिन्नमात्रोपस्थितिदशायां कतिपयाभावमात्रगोचरप्रतीतेरप्यंगीकार्यतया तादृशनियमस्य
सुदूरपराहतत्वात् अत्र केचित् ब्राह्मणः स्वपुत्रं पश्यतीत्यादौ स्वपदं ब्राह्मणत्वावच्छिन्नार्थकमेव विशेष्यीभूतब्राह्मणत्वाद्यवच्छि
न्ने च स्वपदार्थघटितस्य ब्राह्मणपुत्रदर्शनकर्तृत्वादिरूपविशेषणस्य न केवलमाश्रयत्वादिसंबंधेनान्वयोऽपि तु स्वाश्रयत्वस्वनि
रूपकदर्शनविषयपुत्रजनकत्वोभयसंबंधेनैव एवं च तत्र न ज्ञातादृशोभयसंबंधावच्छिन्नतदभाव एव प्रसाध्यतेऽतो नो
क्तदोषावसर इत्याहुः एकशब्दस्य कैवल्यादिविशिष्टे शक्तिः कैवल्यं च सजातीयद्वितीयरहितत्वं तच्च सजातीयनिष्ठभेदाप्र
तियोगित्वं सजातीयत्वं चोद्देश्यविशेषणवाचकैकशब्दात्कैवल्यघटकत्वेन प्रकृतविधेयवत्स्वरूपं प्रतीयते तथा चात्रायमेको
भुंक्ते इत्यादावेतद्देशाधिकरणकभोजनकर्तृनिष्ठभेदाप्रतियोग्ययमत्र भुंक्ते इति बोधः शक्यतावच्छेदकानुगम उक्तदिशा चिं
तनीयः अयं फलमेकं भुंक्ते फलमेकं भुंजानस्तिष्ठतीत्यादौ विधेयत्वाद्यवच्छेदककोटिनिविष्टवाचक एकपदान्वयादृशार्थविशेषण

क्षितावधेयतावच्छेदकावच्छिन्ननिष्ठभेदाप्रतियोगित्वे एकपदशक्तिः यद्वा भेदे प्रतियोगित्वेऽभावे च शक्तिः विधेयान्वितोद्देश्यस्याधेयतासंबंधेन

श०वा० भेदेऽन्वयादिना विशिष्टलाभः स्वाश्रयनिष्ठभेदाप्रतियोगित्वस्वाश्रयत्वोभयसंबंधेन विधेयान्वयस्तु न युक्तः तथा सत्येकपदार्थस्योद्देश्यविशेषणत्वभं कृ०टी०
५४ गापत्तेः यादृशार्थेति कृत्वादिविशेषणतापन्नभोजनादिक्रियेत्यर्थः यदवच्छिन्ने विभक्त्यर्थतावच्छेदककर्मतात्वाद्यवच्छिन्ने स्वार्थान्वयिनः फलादेः

तापन्नेयदवच्छिन्ने स्वार्थान्वयिनो विशेषणत्वं तादृशार्थानुयोगिकान्वयप्रतियोगित्वविशिष्टतद्रूपावच्छिन्नान्वयप्रतियो
गित्वरूपसाजात्यं प्रतीयतेऽतस्तत्र तत्कर्तृकभोजनादिनिष्ठसंसर्गप्रतियोगिकर्मत्वादिनिष्ठसंसर्गप्रतियोगिनिष्ठभेदाप्रति
योगित्वं फलादौ प्रतीयते एकसमानार्थकमात्रादिपदस्थलेऽप्येतादृशी गतिरिति कृतं पल्लवितेन गवादिशब्दात्संस्थानवि
शेषरूपाकृतेरपि बोधस्यानुभविकतया गोत्वादिजातिवत्साऽपि तद्वाच्यैव विशेषणं तस्याश्च वाच्यविशेषणत्वेऽपि न प्रवृत्तिनिमि
त्तता साक्षात्संबंधेन वाच्यवृत्तित्वाभावात् अवयवसंयोगादिरूपायास्तस्याः सामानाधिकरण्यसंबंधेनैव गवादौ सत्त्वात् अत्र च
शक्यताजात्याकृत्योरेकतरविनिर्मोकेणापरभानविरहात् लाघवाच्चोभयविशिष्टे गवादिपदस्यैकैव शक्तिः स्वीक्रियते शक्यविशे
षणभेदेऽपि पुष्पवंतादिपदवद्धेनुपदवच्च शक्त्यैक्यस्य दुरपवादत्वात् यत्तु एकविशिष्टापरावच्छिन्ने शक्तिरिति तदसत् विशे
षणविशेष्यभावे विनिगमनाविरहात् गवाद्यंशे साक्षादुभयप्रकारकबोधस्यानुभवसिद्धस्य दुरपवादत्वाच्च यत्र केवलाकृ

फलादाविति अथ यत्र फलमेकं भुंक्ते इत्यादि फलेतराभोजनपरं तत्र फलस्य बहुत्वादेकत्वबाध इति चेत् तत्रैकपदसमभिव्याहारवशात्फलनिष्ठकर्म राम
ताया इतराकर्मकत्वविशिष्टाश्रयतासंबंधेन भोजनेऽन्वयोपगमान्न दोषः प्रागेवेति द्रव्यपदाद्द्रव्यत्वावच्छिन्नबोधवारणाय जातिविशेषणतया एव ५५

वाच्यतारूपत्वात् विशेषणं गोत्वत्वादिति तादृशज्ञानस्येति यत्तु निर्धर्मितावच्छेदकपरामर्शान्तादृशानुमितिरित्यर्थ इति तन्न निर्धर्मितावच्छेदकानुमिते
रलीकत्वात् तस्मात्तथाविधमानसज्ञानपरोऽयं ग्रंथः अनुपयुक्तत्वादित्यस्यवास्वीकारासंभवादित्यर्थः भ्रमत्वमिति अन्यथाख्यात्युपगंतृ मीमांसक

ति विशिष्टे गवादिपदस्य तात्पर्यं यथाभिष्टमप्यो गाव इत्यादौ तत्र शुद्धगोत्वाद्यवच्छिन्नपरो धेन्वादिपद इव लक्षणैव जात्याकृतिवि
शिष्टायां व्यक्तौ शक्तेरैक्यं जात्याकृतिव्यक्तयः पदार्थ इति न्यायसूत्रे बहुवचनमनुपेक्ष्य पदार्थ इत्येकवचनोतं निर्दिष्टवतो महर्षेरप्यनु
मतं मीमांसकास्तु गवादिपदानां जातिरेव वाच्या न तु व्यक्तिराकृतिर्वा व्यक्तिशक्तिमतेपि स्वरूपतस्तस्याः ग्रहासंभवेन शक्तिज्ञा
नप्रकारीभूतायां जातौ शक्तेस्तदवच्छेदकताया आवश्यकल्पनीयतया व्यक्त्यादौ तत्कल्पनायां गौरवात् प्रयोजनविरहाच्च व्य
क्तिशक्तिमते च जातेरुपलक्षणत्वासंभवः प्रागेव दर्शितः यथा व्यक्तिशक्तिमतेपि गोत्वादौ शक्तिस्तदवच्छेदकतावात हि शेषणा
नवच्छिन्नैव तथा जातिशक्तिवादिमतेपि सा तथैवेति न गोत्वत्वादिप्रवेशाद्गौरवशंकापि नहि जातिशक्तिवादिमतेपि शाब्द
बोधे सा यत्किंचिद्धर्मप्रकारेण भासते येन प्रकारभानार्थं प्रकारविशेषमंतर्भाव्य शक्तिः कल्पनीयाऽपि तु स्वरूपत एव अथा
नुमानादिना गोत्वादौ शक्तिग्रहो भवन् धर्मितावच्छेदकविधया गोत्वत्वादिकमवश्यं विषयीकरोति निर्धर्मितावच्छेदकज्ञा

मते तदानंगीकर्तृगुरुमते त्वाह विषयबाधेनेति स्वरूपत इति गोत्वे शक्तं पदमित्याद्याकारः अत्र गोपदशक्तिर्गवादि पदं वा गौरित्याकारमपि हरिदा
सभट्टाचार्यादयो दर्शयंति अनुव्यवसाय इति घटत्वप्रकारकं घटत्वीयमिति मतभेदः धर्मीति अन्यथा प्रमाणस्य स्वतो ग्राह्यत्वापत्तेरिति भावः

स्वतोग्राह्यत्वमते एवोक्तनियममेव्याह अस्तुचेति गवादीति गोपदशक्तिर्गोपदे वा गोमदिति स्वाश्रयप्रतियोगित्वसंबंधेन गोत्ववान् तादृशबोधमपि नि

नस्यानुमानादिनाजननासंभवात् तादृशज्ञानस्य विपरीतज्ञानाविरोधितयानुपयुक्तत्वाच्च एवंच तादृशधर्मस्य शक्यतावच्छे
दकत्वं दुर्वारमेव शक्तिग्राहकमानेन धर्मितावच्छेदकांशे तदवच्छेदकताग्रहे बाधकाभावात् यदि चावच्छेदकताग्रहेपि शक्ति
धियस्तदंशे भ्रमत्वं कल्प्यते विषयबाधेनावच्छेदकत्वमेव शक्तिग्राहकमानेन न गृह्यत इत्येव वा स्वीक्रियते तदा प्रतियोगित्व
कारणत्वादीनामपि तुल्ययुक्त्यावच्छेदकत्वविलयप्रसंगस्तत्राप्येवं सुवचत्वात् प्रतियोगित्वादिबुद्धेरवच्छेदकत्वग्राहकत्व
मनुभवसिद्धमिति यदा तादृशशक्तिधियस्तदवगाहिता न तथेति वचनं को वा श्रद्दधाति विशेषाभावात् मा भूद्वा गोत्वत्वादिकम
वच्छेदकं शक्यतायास्तथापि शक्तिज्ञानकारणतायां गुरुशरीरगोत्वत्वादेर्धर्मितावच्छेदकतात्मकविषयतानिवेशाद्गौरवं दु
र्वारमेव व्यक्तिशक्तिवादिना स्वरूपतो गोत्वादिनिष्ठधर्मितावच्छेदकत्वस्यैव निवेशादिति चेन्न स्वरूपतः पदविशेषणतापन्न
शक्तौ निरूपकतासंबंधेन शक्तिसंबंधेन पदे वा गोत्वादिप्रकारिकाया एव शक्तिधियः स्वीकारात् नहि समवायेनैव जातेः स्वरू
पतः प्रकारतेति नियमः प्रामाणिकः घटं जानातीत्यादौ प्रकारितासंबंधेन स्वरूपतो घटत्वादीनां ज्ञानाद्यंशे प्रकारतोपगमात्
समवायेन धर्मिविशेषणतापन्नस्यैव संबंधान्तरेणान्यत्र स्वरूपतो भानमित्यपि न नियमः प्रामाण्यस्य परतोग्राह्यतापक्षेऽयं

रस्यति स्वीकुरुते वेति ॥ व्यक्तौ शक्तिस्वीकारे युक्त्यंतरमाह एवमिति ॥

घटइत्याकारकस्य स्वरूपतो घटत्वादि ज्ञानस्यानुव्यवसाये प्रकारितायां तत्संबंधेन ज्ञाने वा धर्मिविशेषणतानापन्नस्यैव घटत्वादेर्भानात् अस्तु वा प्रकृतेपि गवादिविशेषणतापन्नस्यैव गोत्वादेः शक्तौ निरूपकत्वसंबंधेन पदे वा शक्तिसंबंधेन स्वरूपतः प्रकारता गवादेश्च शक्तौ पदे वा परंपरासंबंधेन प्रकारता तादृशी च गवादिविषयतानशाब्दबोधजनकतावच्छेदिका परंपरासंबंधेन प्रकारताया जनकतावच्छेदकत्वापेक्षया साक्षात्संबंधावच्छिन्नप्रकारताया एव तथात्वे लाघवेन व्यक्तिशक्तिसिद्धेर्नावकाशः अथ जातिशक्तिमतेपि शाब्दबोधे व्यक्तिभानमावश्यकं गौर्नष्टा गोर्ज्ञाता गामानयेत्यादौ समभिव्याहृतान्वयस्य जातौ बाधात् परंपरासंबंधेन तदन्वयोपगमेऽन्वयितावच्छेदकतया गोत्वत्वादिभानस्वीकारापत्तेः शक्तौ गोत्वत्वाद्यंतर्भावापत्तेश्च नहि स्वरूपेण पदार्थस्य पदार्थांतरान्वयितया भानं कश्चित्स्वीकुरुते स्वीकुरुते वा प्रकारतया स्वरूपेणोपस्थितजातेर्भानं विशेष्यतया तज्ज्ञाने तु नसंभवस्येव निर्धर्मितावच्छेदककशाब्दबोधस्य प्रवृत्त्यनुपयोगितया तत्स्वीकारासंभवात् एवं च जातिमात्रवाचकत्वेनाभ्युपगतपदस्यापि व्यक्तिबोधकतायामविवादाद्व्यक्तिशक्तिर्ध्रुवैव भ्रमाजन्यलक्षणाग्रहाजन्यतद्बोधजनकताया एव तच्छक्तिसाधकत्वात् अन्यथा जातावपि शक्त्यसिद्धिप्रसंगात् एवं शक्तेरीश्वरसंकेतरूपत्वेन

तदुपन्यासे ईश्वरानंगीकारोपन्यासे नि रुत्तरत्वापातात् असदुत्तरत्वात् क्वचित्तथैव पाठः कुब्जशक्तिमतमालंब्य समाधत्ते व्यक्तिशक्ताविति हेतु

क्तिबोधकतायाः परेऽबाधितत्वेनेश्वरेच्छाविषयतया तस्या अपि शक्यत्वं दुरपन्हवं नहि मीमांसकैर्भगवान्नानुमन्यत इत्येताव
तैव तादृशश्रुत्यनवकाशः तत्साधकबहुतरयुक्तिसत्वेन तदुपन्यासस्यापि निरुत्तरत्वापातात् एवं ज्ञाने पदानां शक्तिरित्येतादृ
शतन्मतेपि व्यक्तिज्ञानसमर्थस्य पदस्य जाताविव व्यक्तावपि वाच्यत्वं दुरपन्हवमेव शक्तिनिरूपकज्ञानविषयस्वरूपस्य तस्या
विशेषण जातिव्यक्त्योः सत्वादिति चेन्न व्यक्तिशक्तावस्माकं नवैमत्यं अपितु व्यक्तिशक्तिज्ञानत्वेन हेतुतायामेव अतएव व्यक्तेर्न
कुब्जाशक्तिरिति गीयते तदंशे तज्ज्ञानानपेक्षणात् अतएव व्यक्तेर्न वाच्यता नहि शक्तिधीविषयतामात्रेणैव वाच्यता तादृशविषय
ताया अन्वयसाधारण्यात् अपितु यद्विषयकत्वेन शक्तिज्ञानस्य तद्विषयकशाब्दधीजनकता तत्वमेव तत्प्रयोज्यव्यवहारनिया
मकं अन्वयांशे कुब्जशक्तिसत्वेपि यथा तद्विषयकत्वेन शक्तिज्ञानजनकतायां नावच्छेदकं तथा व्यक्त्यंशे तत्सत्वेपि तद्विषयकत्व
स्य शक्तिज्ञानजनकतायामनवच्छेदकत्वात् न व्यक्तौ तद्व्यवहारः तद्विषयकत्वस्य शाब्दधीविशेषणत्वात् गवादिपदशक्तिज्ञान
स्य गोत्वादिज्ञानविषयकत्वेन गोत्वादिशाब्दधीहेतुत्वेपि न गवादिपदस्य गोत्वादिज्ञानवाचकत्वापत्तिः वस्तुतो यद्विषयकत्ववि
शिष्टज्ञानविषयकत्वेन शक्तिज्ञानस्य शाब्दधीजनकता यद्विषयकत्वेन वा शाब्दधियः शक्तिज्ञानजन्यता तत्वमेव तथा एतेन

तायामेवेति तथासत्यानंत्यव्यभिचारौ वा स्यादिति भावः अन्वयेति अन्वयांशेपि कुब्जशक्तिरिति भावः अन्विताभिधानमते तु नायं ग्रंथः पदार्थद्वय

न्वयस्य तन्मते वाच्यत्वात् अन्वयांशे इत्यनुपदं ग्रंथात्'' गोत्वादि ज्ञानेति शक्तिघटकत्वेनेत्यादि'' नगवादि पदस्येति गोत्वादिज्ञानविषयकत्वस्य तत्कार्य
तावच्छेदकत्वादिति भावः संकेतशक्तिपक्षेणाभिधाय सामर्थ्यशक्तिपक्षसाधारण्येनाह यद्विषयकत्वेनेति शक्यज्ञाने ज्ञानजन्यजन्यत्वेन शक्ति

ज्ञानत्वज्ञानस्यापि ज्ञानपदवाच्यत्वापत्तिः शक्यज्ञानविषयत्वेनैव ज्ञानपदशक्तिज्ञानस्य ज्ञानत्वज्ञानविषयकशाब्दधीजनकत्वादिति परास्तम् कारणत्वस्य कार्यत्वस्य चावच्छेदकगर्भे गोत्वादिविषयकत्वस्य निवेशाङ्गत्वादेर्वाच्यतोपपत्तिः एवं च गौर्गौपदशक्येत्याकारिकापि शाब्दबोधोपयोगिनी शक्तिधीः संभवति व्यक्त्यंशे शक्तेरबाधेनान्यथाख्यात्यापत्तिविरहात् तादृशज्ञानस्य शाब्दधीहेतुत्वेपि गोत्वधर्मितावच्छेदककज्ञानत्वेन व्यक्तिविषयतामनंतर्भाव्यैव गोत्वप्रकारकबुद्धेस्तथात्वादुक्तरीत्या व्यक्तेर्वाच्यतोपपत्तिः नचैवं व्यक्त्यंशे शक्तिज्ञानस्यापेक्षिततया तदंशे शक्तेः कॢप्तत्वानुपपत्तिरिति वाच्यं कार्यकारणभावावच्छेदककोटौ व्यक्त्यनंतर्भावस्यैव तदंशे कॢप्तत्वव्यवहारनिर्वाहकत्वात् अतएव सामान्यलक्षणापूर्वपक्षे मणिकृतां समानप्रकारकत्वेन शक्तिज्ञानशाब्दबोधयोर्हेतुहेतुमद्भावाभिधानमपि न विरुध्यते नच व्यक्त्यंशे गोत्वप्रकारकज्ञानस्य गवांशे गोत्वप्रकारकज्ञानहेतुत्वेपि कार्यकारणभावयोः समानप्रकारकत्वस्याक्षतत्वान्न तद्विरोध इति वाच्यं शक्त्यंशे गोत्वादिप्रकारतामादाय समानप्रकारकत्वस्याभिमतत्वे पूर्वं वक्ष्यत इत्यस्यासंगत्यापत्तेः अपूर्ववादे समानप्रकारकाद्धि

विषयकज्ञानं'' एतेनं'' ज्ञानविषयकत्वविशिष्टज्ञानविषयकत्वेन जन्यतानवच्छेदकत्वेन एवं च गव्यपि शक्तेः सिद्धौ च अत इति यतः व्यक्तिशक्तेः कॢप्तत्वं

शा०वा० जनकतावच्छेदकविषयतावत्त्वं नवज्ञातत्वं मतद्वयस्यार्थः एतावता कुञ्जशक्तिमतं परिष्कृत्य तन्मते मोक्तकार्यकारणभावं दूषयति वस्तुतस्त्विति कथंचि क०टी०
५७ दिति यदुपरक्तविषयताजनकतावच्छेदिका स एव वाच्यः व्यक्तेस्तु गत्वा विषयता तथा न तूपरक्तेति न तस्या वाच्यत्वापत्तिः यत्तु जनकतावच्छेदकीभूत

ऊपदस्य कार्यत्वेन पद्यादिरूपकार्ये शक्तिज्ञानात्कार्यत्वेनापूर्वविषयकशाब्दबोध इत्येवाभिधानात् शक्त्यंशे शाब्दधीप्रकारप्रकारकज्ञानस्य हेतुतायास्तत्रानुक्तेः न चैवं जात्यंशे सा ज्ञाता व्यक्त्यंशे स्वरूपसती हेतुर्गवादिति कुञ्जशक्तिवाद इत्यादिचिंतामणिग्रन्थविरोध इति वाच्यं मतभेदेन तत्रोभयसंगतेः वस्तुतस्तु जातिधर्मितावच्छेदकशक्तिज्ञानस्य हेतुत्वे व्यक्तेर्विषयतापि कारणतावच्छेदककोटौ निविशते विशेष्यतावच्छेदकतात्वेन व धर्मितावच्छेदकीयविषयताविशेषस्य निवेशनीयत्वात् अवच्छेदकतानिरूपकविशेष्यतायाः व्यक्तिविषयतारूपत्वात् एवं च व्यक्तेरवाच्यताव्यवहारस्य कथंचिदुपपादनेऽपि शक्त्यंशे जातिप्रकारकज्ञानहेतुतापेक्षया गौरवं दुर्वारमेव कारणतावच्छेदकेऽधिकविषयताया निवेशात् एवं द्रव्यत्वादिधर्मितावच्छेदककभ्रमात्मकगवादिपदशक्तिज्ञानाद्द्रव्यत्वादिप्रकारकशाब्दधीवारणाय शक्त्यंशे धर्मितावच्छेदकावच्छिन्नत्वावगाहित्वस्याप्यधिकस्य निवेशनीयतया गौरवमपि व्यक्तौ कुञ्जशक्तिवादिनामपि शक्त्यंशे जातिप्रकारकज्ञानहेतुतामतमेव साधीयः

धर्मितावच्छेदकतावत्त्वं वाच्यत्वमिति तन्तुच्छं विनिगमनाविरहेण जनकतावच्छेदकधर्मितावत्त्वस्य वाच्यत्वस्य दुर्वारत्वात् शक्त्यंशे इति तादृशभ्रम राम
तापेक्षेत्यर्थः अधिकविषयता व्यक्तिविषयता संकेतशक्तिमते च व्यक्त्युपरक्ता विषयताजनकतावच्छेदकेति महागौरवं कटाक्षितं भट्टानां पदः ५७

र्थांतरं शक्तिः गुरूणां सामर्थ्यं शक्तिरित्यान्यरं भेदोस्तु कार्यकारणभावस्तु भट्टवदेव कार्य इत्याह एवमिति शक्त्यंशे इति न्यायमत एव दोषस्य प्रागुद्धृतत्वादिदं गुरुमते शक्त्यंशे इति गोपदशक्तिः गोरित्याकारकं इदानीं कुंअशक्तिं खंडयति वस्तुत इति ईश्वरेति न्यायमते उक्तदोषोद्धारप्रकारप्रदर्शनेपीश्वरानंगी

वस्तुतस्तु सर्वलाक्षणिकस्थले व्यन्वयबोधस्यानुभविकत्वेन दुरपह्नवतया लाक्षणिकस्याप्यनुभावकत्वं दुर्वारमेवेति तस्य लक्ष्यार्थे कुअशक्तिप्रसंग इति नानुभवजननसामर्थ्यमीश्वरसंकेतो वा वृत्तिरूपा शक्तिः अपितु पदार्थांतरमेव सा च जातावेव कल्प्यते न तु व्यक्त्यादावपीति न कुअशक्तिरपीति तत्त्वं अथ व्यक्तेर्गवादिपदावाच्यत्वे गवादिपदाद्व्यक्तेः स्मरणमनुभवश्च न स्यात् न च पदावाच्यत्वे व्यन्वयस्येव व्यक्तेर्भानं शाब्दबोधेनानुपपन्नमिति वाच्यं यद्धर्मप्रकारकशाब्दबोधे तद्धर्मप्रकारकपदार्थोपस्थितेर्हेतुतया गोत्वप्रकारकशाब्दबुद्धौ गोत्वप्रकारकस्मरणस्यापेक्षणीयतया व्यक्तेरस्मरणे व्यक्तेः शाब्दबोधविषयताया दुरुपपादत्वात् अन्वयस्य च भाने ऽन्वयांशे शाब्दधियो निष्प्रकारतया तदुपस्थित्यनपेक्षणे तत्र वाच्यत्वानुपयोगादिति चेदत्र भट्टाः पदाद्व्यक्तेर्न स्मरणमनुभवो वा किं त्वाक्षेपादेव व्यक्तिधीः आक्षेपिका जातिरेव आक्षेपश्चानुमानमर्थापत्तिर्वा न च जातिव्यक्त्योर्वैयधिकरण्यसंभवः तादात्म्यसंबंधेन जातेराधेयतासंबंधेन व्यक्त्याक्षेपकताया अविरोधात् वस्तुतस्तु गामानयेत्यादौ त्वा

कर्तॄणां तत्संकेतस्य शक्तित्वं व्याहतमिति भावः न स्यादिति तथा च गोर्न शक्यो गोर्जातेस्तादृशान्वयबोधानुपपत्तिरिति भावः आक्षेपादेवेति अनाक्षिप्तभानमर्थाध्याहारो न भट्टसंमत इति बोध्यं नन्वाक्षेपकस्यानेव विलंबापत्तिरित्यत आह वस्तुतस्त्विति एतन्मते गोनिष्ठकर्मत्वज्ञानस्योत्तरत्वं दर्शयति।

श०वा० तेनसंबंधेनेति आक्षेपोत्तरं शाब्दबोधाय प्रकारांतरेणाक्षेपं वदतां मतमाह गोत्वमिति गगनवारणाय धर्मपदं व्यक्त्यघटितेति गोत्वत्वाद्यनात्मकं गोपदश कं०टी०
५८ क्यत्वगोत्वनिष्ठतद्व्यक्तित्वादि अलोचनं निर्विकल्पात्मकं इत्यपरेत्याह तादृश बुद्धेरिति एवं गवादावित्यादि अधिकपाठः केचित्तु तत्र कर्मत्वस्य विशेष

अयवृत्तित्वरूपपरंपरासंबंधेनानयनकर्मत्वादौ गोत्वादिजातेरन्वयः शाब्दः तेनसंबंधेन गोत्वादिमत्वस्याधेयतासंबंधेन गवादि
व्याप्यत्वात् आधेयतासंबंधेन गवादिमत्वं विनानुपपद्यमानत्वाच्चानयनकर्मत्वादेराधेयत्वादिसंबंधेन गवादिव्यक्तिप्रकारि
काधीः आक्षेपात्पूर्वं संसर्गघटकतया शाब्दबोधे व्यक्तिभानेपि कर्मत्वाद्यंशे गोत्वाद्यवच्छिन्नव्यक्तिप्रकारकभानानुरोधेनाक्षे
पादरः गोत्वं गवाश्रितं गोनिष्ठभेदप्रतियोगितानवच्छेदकधर्मत्वात् किंचिदाश्रितं वा जातित्वादित्यनुमानतो व्यक्तिभानं तु न सा
र्वत्रिकं तादृशहेतुपस्थितेरसार्वत्रिकत्वात् गवादिपदात्तादृशरूपेण गोत्वादेरनुपस्थितेः अथ गवादिपदाद्व्यक्तेरस्मरणे
गोत्वादिस्मरणमेव कथमुपपद्यते गोत्वप्रकारकस्मरणे व्यक्तेर्विशेष्यतया भाननियमात् तद्विशेष्यकस्मरणे च व्यक्तिघटित
गोत्वत्वादेः प्रकारतया भाननियमात् व्यक्त्यघटितप्रकारकस्य स्मरणस्य संभवेपि स्वरूपत एव जातेः शक्यतया धर्मांतरविशे
ष्यतया तत्स्मरणासंभवात् धर्मांतरप्रकारेण स्मरणेपि गोत्वाद्यंशे निष्प्रकारकशाब्दज्ञानासंभवेन तादृशस्मृतेरनुपयोगि
त्वादिति चेन्न पदादालोचनरूपस्यैव स्मरणस्योपगमात् किंचिद्धर्मावच्छिन्नसंबंध्युपरक्तसंबंधज्ञानाधीनतत्संबंधिस्मृतेः राम ५८

णत्वार्थमुपलक्षणत्वे दोषमाह तादृशगोत्वादेरिति श्रीकरमतं उत्थापयति एतेनेति अर्थापत्तीति आनयनकर्मत्वस्य गवादिमत्वं विना गोत्वादि

मत्वमनुपपन्नमिति ज्ञानेत्यर्थः तावता आधेयतासंबंधावच्छिन्नगवाद्यभावव्यापकतया स्वाश्रयवृत्तित्वसंबंधावच्छिन्नतादृशाकर्मत्वाभावभानेपि शाब्दबोध

समप्रकारत्वनियमेपि निर्विशेषणकसंबंध्युपरक्तसंबंधज्ञानान्निर्विकल्पकस्मरणे बाधकाभावात् निर्विकल्पकस्य संस्काराजनकत्वेपि विशिष्टज्ञानाहितविशिष्टगोचरसंस्काराद्विशेष्यानुद्बोधदशायां केवलविशेषणांशस्मरणेन विरोध इति वदंति तदसत् गवादिपदात्स्वरूपतो गोत्वादिज्ञानेपि व्याप्यतावच्छेदकप्रकारेण तद्ग्रहासंभवाद्व्याप्त्याक्षेपासंभवात् नच शाब्दधीविषयेण परंपरासंबंधेन गोत्वादिविशेषितकर्मत्वादिहेतुनाऽऽनयनादौ गवादिकर्मकत्वमनुमेयमिति वाच्यं विशिष्टसाध्यस्य प्रागप्रतीतेः एवं गोत्वानीयतामित्यादौ स्वरूपत उपस्थितस्य गोत्वादेरेव विशेष्यतया भानोपगमे निर्धर्मितावच्छेदककशाब्दधीस्वीकारापत्तिः तादृशबुद्धेराक्षेपकतावच्छेदकावच्छिन्नाविषयतयाव्यक्त्याक्षेपानुपयोगितापत्तेश्चेति व्यक्तेः शाब्दबोधे विशेष्यादिविधयाभानमावश्यकमित्यवधेयं एतेन जातिवाचकपदाज्जातिबोधः व्यक्तिबोधस्तूपादानिक एवेति श्रीकरमतमनुपादेयं उपादानस्यार्थापत्तिरूपत्वे भट्टमताविशेषात् नच जातिरेव व्यक्तिबोधिका जातिकरणकत्वमेवौपादानिकत्वं बोधस्येति वाच्यं जातेः प्रमाणांतरत्वकल्पनापेक्षया व्यक्तिशक्तिकल्पनाया एवोचितत्वात् एवं जातेर्नित्यतया सर्वदैव तद्धेतुकव्यक्तिधीवारणाय जातिहेतुकव्यक्तिबोधे जातिशक्तिज्ञानघटिततच्छाब्दसामग्र्याः सहकारित्वमवश्यमुपगंतव्यं तथा च तादृशसामग्र्या एव व्यक्तिभानप्रयो

स्यापत्तावच्छिन्नाविषयत्वादिति भावः जातिरेवेति अर्थापत्त्यादिकं तु सहकारीति भावः तद्धेतुकेति तदुपादानकेत्यर्थः हेतुकेति कारणकेत्यर्थः अं

शा०व ॥ शाभेदेनशाब्दत्वौपादानिकत्वत्वयोःसमावेशमालंव्यशंकते नचेतिँतावताव्यक्त्यंशेकारणांतरानपेक्षायांमंडुनमतमुत्थापयति व्यक्तेरपीति उत्पादेतिँत ॥ क०टी०
५६

जकत्वसंभवेजातेःप्रमाणांतरत्वकल्पनमनर्थकं नच जातिनिरपेक्षजातिभासकसामग्र्या व्यक्तिभानप्रयोजकत्वे व्यक्त्यंशेपि शाब्द
त्वमावश्यकं तथासतिचशक्तिज्ञानजन्यव्यक्तिस्मृतिरपेक्षतेजातेःकारणत्वेचव्यक्त्यंशेऔपादानिकत्वमेवनतुशाब्दत्वमितिन
तदपेक्षितिवाच्यं व्यक्तिभानांशेजातेःकरणत्वेतदंशेऽशाब्दत्वोपगमसंभवेतदकरणत्वेपितत्संभवात् जातेरकरणत्वेव्यक्त्यंशे
कीदृशकरणस्यजन्यतावच्छेदकधर्मवत्वमितिचेत् नकस्यापितावतापिक्षतिविरहात् व्यक्तेरपिबोधःशाब्दादेवनत्वाक्षेपादि
तःव्यक्तिशाब्दबोधेशक्तिविरहोनानुपपत्तिप्रयोजयतिलक्षणा तएवतदुपपत्तिरितिमंडनाचार्यमतं तदुक्तंजातेरस्तित्वना
स्तित्वेनहिकश्चिद्विवक्ष्यति नित्यत्वाल्लक्ष्यमाणायाव्यक्तेस्तेहिविशेषणे इति अस्तित्वनास्तित्वेउत्पादविनाशौ लक्षणाचजा
तिप्रकारेणैवबोधयतिनतुव्यक्तित्वादिनेतिनानुभवविरोधःनीलादिपदस्यशक्यनीलादिगुणपुरस्कारेणलक्षणयाबोधकत्वव
च्छक्यजातिपुरस्कारेणलक्षणयागवादिपदस्यव्यक्तिबोधकत्वेऽ विरोधात् स्वार्थादन्येनरूपेणज्ञानेभवतिलक्षणेत्यत्रस्वा
र्थपदस्यशक्यतावच्छेदकपरत्वात् अत्रेदंचिंत्यं गवादिपदाल्लक्षणयागोत्वादिप्रकारकबोधोपगमेजातिशक्तिरन्वयबो
धेनापेक्ष्यतेलक्ष्यतावच्छेदकतायाएवजातिभानप्रयोजकत्वसंभवात् नचशक्तिंविनाव्यक्तौशक्यसंबंधरूपलक्षणैव राम
५९

॥ थागोजातागौर्नष्टेतिव्यवहारवारणायव्यक्तौलक्षणाआवश्यकीत्यर्थः अतथात्वात् अनुपयोगित्वात् शाब्दार्थानुपस्थापकादितिभावः अथेति लक्ष्यताव ॥

च्छेदकतयाजातिभानासंभवेजातिशक्तिरावश्यकीत्याशयः व्युत्पत्तीतिभिन्नपदोपस्थाप्यार्थेन्वयबोधेविषयितावच्छेदकरूपेणोपस्थितिस्तंत्रमि

नसंभवतीतिशक्तेरूपयोगितेतिवाच्यं लक्षणानिर्वाहार्थंशक्तिकल्पनेगवादिपदस्यद्रव्यत्वादावपिविनिगमनाविरहेणशक्तिकल्प
नप्रसंगात् द्रव्यत्वादिसंबंधेनापिगवादौलक्षणासंभवात् प्रयोगविरहस्यद्रव्यत्वादाविवस्वातंत्र्येणगोत्वादावप्यविशिष्टत्वात्
लक्षणाघटकतयाशक्तेरूपयोगितायांतस्याःवृत्तित्वानुपपत्तेःस्वातंत्र्येणातथात्वात् अथाकृतिविशिष्टायामेवव्यक्तौलक्षणया
आकृतिप्रकारेणव्यक्तिबोधस्यनैयायिकानामप्यनुमतत्वात् तत्रशक्त्युपस्थितजातेरन्वयउपेयते नचाकृतावेवशक्तिर्जाति
विशिष्टेलक्षणेतिवैपरीत्यमेवकिंनस्यादितिवाच्यं आकृतेरवयवसंयोगविशेषरूपायाआनंत्यात्तदपेक्षयालघीयस्यांजाता
वेवशक्तिकल्पनस्यौचित्यात् नचावयवसंयोगनिष्ठजातिरेवशक्यास्तुव्यक्तौतदन्वयश्चस्वाश्रयघटितपरंपरासंबंधेनस्वी
क्रियतामितिवाच्यं आकृतिप्रकारकबोधस्यानुभविकत्वात् लक्ष्यार्थानुपरक्तायांकेवलजातौप्रयोगविरहश्चनशक्त्यभा
वसाधकःअप्रयोजकत्वात् तत्रप्रयोगमात्रविरहस्यैवतदशक्यत्वबीजत्वेजातावप्रयोगस्यासिद्धत्वात् तात्पर्यसत्वेचवृ
त्तिद्वयाधीनबोधोपगमेक्षतिविरहात् नचैवंकेवलमुख्यार्थतात्पर्येणगविनित्यत्वमितिस्वारसिकप्रयोगापत्तिरितिवाच्यं श
क्त्यास्वरूपतउपस्थितायाजातेःसमानपदोपात्तधर्मिण्याश्रयतासंबंधेनान्वयस्यैवव्युत्पन्नत्वात् नचान्वयितावच्छेदकरू

त्याशयः द्वयस्येति नचभवन्मतेपिजातिप्रकारत्वेसतिव्यक्तिविशेष्यकत्वेनव्यक्तिविशेष्यकत्वेसतिजातिप्रकारत्वेविनिगमनाविरहाभावात् हस्तिसंस्कारोद्बोधक

म्रा०वा० ६०

हस्तिपकज्ञानस्य हस्तित्वोद्बोधकत्वे कुतो न द्रव्याद्युद्बोधकत्वमित्यत्राह उद्बोधकस्येति कल्पत्वादित्यस्य विरोधविरहादित्यनेनान्वयः ससंकोचः कारणवैशिष्ट्यं

पेणानुपस्थितताया जातेरन्वयो विरुध्यते व्युत्पत्तिवैचित्र्येण प्रकारतया स्वरूपतः उपस्थितताया जातेरन्वयस्वीकारे क्षतिविरहादिति री
त्या चेन्मतमेतत्परिष्क्रियते तथापि स्वरूपतो गोत्वान्वयबोधस्य लक्ष्यार्थगवादौ स्वीकारे तादृशान्वयबोधं प्रति योग्यताज्ञानादीनां
कारणताकल्पनाधिक्यात् गोत्वादिविशिष्टव्यक्तिशाब्दसामग्रीप्रतिबंधकतायां जातिव्यक्तिविषयकोपस्थितिद्वयस्य निवेशनी
यतया प्रतिबंधकतावच्छेदकशरीरगौरवाच्च जात्याकृतिविशिष्टव्यक्तिशक्तिपक्ष एव साधीयान् प्राभाकरास्तु जातिशक्तिज्ञाना
देव जातिप्रकारेण व्यक्तेः स्मरणं शाब्दबोधश्च न तु निर्विकल्पकरूपं जातिस्मरणं निर्विकल्पकानभ्युपगमात् व्यक्तिसंबंधज्ञानवि
रहेण नदं प्रातुद्बोधाद्व्यक्तिस्मरणासंभव इति तु नाशंकनीयं व्यक्तिमविषयीकृत्य स्वरूपतो गोत्वादिज्ञानासंभवेन गोत्वाद्युद्बोधक
स्यैव व्यक्त्युद्बोधकत्वात् उद्बोधकस्य फलबलकल्प्यत्वात् संबंधितावच्छेदकहस्तित्वादिसंबंधाय हेहस्त्यादिसंबंधिहस्तिप
कादिज्ञानात्वको द्बोधकबलाद्धस्त्यादिस्मरणे हस्तित्वादेः प्रकारतया भानवद्व्यक्तिसंबंधज्ञानमंतरेणापि जातिसंबंधिपदज्ञाना
ज्जातेः स्मरणे व्यक्तेर्विशेष्यतया भाने विरोधविरहात्तद्धर्मप्रकारकस्मृतौ तद्धर्मावच्छिन्नसंबंधितया गृहीतवस्तुज्ञानस्य हेतुताया
मरत्वादिरूपोद्बोधकजनितस्मृतौ व्यभिचारवारणाय कार्यतावच्छेदकसंकोचस्यावश्यकतया तत एव मतान्तेऽपि व्यभिचारानव

निवेश्यं नियमत इति पदं गोमत्पशक्तिर्वा गोमतीत्यादौ व्यक्तेर्भानेपि पदं गौः शक्तिः गौरित्यादिज्ञाने तद्भानात् व्यक्तीति गौरित्यनुभवस्येत्यर्थः जात्युद्बोध

कृ०टी०

राम ६०

कवलादेवो दुष्टादिति शेषः ॥ संबंधांतरासमानकालीनत्वादि गुरूणामपीतिते: पश्वादिपदधर्मिणि शक्तिस्वीकारात् जागरूकत्वादिति व्यक्तौ शक्तिस्वीकारे तद्विषयताया

जं काशात् जातिशक्तिज्ञाने नियमतो जातिप्रकारेण व्यक्त्युपभानात्तज्जन्यसंस्कारान्नियमतो व्यक्तिस्मरणासंभव इति चेत्काक्षतिः व्यक्तिविषयकज्ञानांतरस्यावश्यकतया तज्जनितसंस्कारादेव व्यक्तिस्मरणसंभवात् अथ भवतु जातिशक्तपदज्ञानाज्जातिप्रकारेण स्मरणं तथापि तत्प्रकारकशाब्दबोधो न संभवति तद्धर्मप्रकारकधर्मिविषयकशाब्दबोधे तद्धर्मप्रकारेण धर्मिगृहीतवृत्तिकपदज्ञानजन्यतद्धर्मप्रकारकव्यक्त्युपस्थितेर्हेतुत्वात् पदे गृहीतवृत्तिकत्वमात्रनिवेशे घटत्वादिगृहीतवृत्तिकपदाद्गोत्वाद्यवच्छिन्ननिरूपितसंबंधांतरावगाहिज्ञानजन्यगोत्वादिप्रकारकस्मरणाद्गोत्वादिप्रकारकशाब्दबोधापत्तेः तद्धर्मगृहीतवृत्तिकत्वनिवेशेऽपि पशुत्वादिप्रकारेण धर्मिगृहीतधर्मगृहीतवृत्तिकपश्वादिपदात्पशुत्वादिप्रकारकशाब्दबोधस्य गुरूणामनुमतस्यानुपपत्तेः नच प्रकारीभूतधर्मभेदेन कार्यकारणभावभेदस्य यत्ततत्त्वाननुगमेनावश्यकत्वाज्जातिप्रकारकशाब्दबोधे जातिगृहीतवृत्तिकपदज्ञानजन्यस्मरणस्यैव हेतुत्वमंगीकार्यमिति वाच्यं एवमपि जातिप्रकारकशाब्दबोधानुपपत्तेर्जागरूकत्वात् लक्षणाज्ञानाधीनपदार्थोपस्थितेर्हेतुत्वांतरकल्पने च गौरवात् नच तन्मतेऽध्याहृतस्यार्थस्य बोधविषयतया पदजन्यपदार्थोपस्थितित्वेन हेतुतैव नास्ति कथमुक्तानुपपत्त्यवसर इति वाच्यं सर्वपदार्थाध्याहारस्य लेऽन्वयबोधवारणाय तन्मतेऽपि तादृशहेतुताया व्यवस्थापितत्वात् नचत

पदप्रयोज्यत्वासंभवाज्जातिप्रकारेण व्यक्तिभानं न संभवतीत्यर्थः ननु तत्र व्यक्तौ लक्षणास्वीकारात्तद्विषयतापदप्रयोज्यास्त्वित्यत आह लक्षणाज्ञाने

श०वा० ६१ ति अध्याहारेति अध्याहारात्मकार्थोपस्थितेरित्यर्थः येन रूपेण अर्थोपस्थितित्वेनेति सिद्धांतादित्यस्येइति शंकेत्यादिनान्वयः उक्तसिद्धांतोपगमे सर्वलाक्षणि क०टी०

थापि पदज्ञानजन्यपदार्थोपस्थितित्वघटितकारणतावच्छेदकेन व्यक्तिलाक्षणिकपदजन्यव्यक्त्युपस्थितेरसंग्रहेण दोषाय अ
ध्याहाररूपार्थोपस्थितेर्येन रूपेण हेतुता व्यवस्थापिता लक्ष्यार्थोपस्थितेरपि तद्रूपाक्रांततयैवोपपत्तेः शक्तपदस्यैवानुभावक
तेति सिद्धांतात्सर्वलाक्षणिकस्थलेऽन्वयबोधानुपगमात्तत्स्थलीयसामग्रीबलात्सर्वार्थाध्याहारस्थलेप्यन्वयबोधापत्तिरिति
शंकानवकाशादिति वाच्यं यत्र लाक्षणिकपश्वादिपदाद्गोत्वादिप्रकारिकोपस्थितिस्तद्व्यवहितोत्तरद्वितीयादिविभक्तितः श
क्त्याकर्मत्वाद्युपस्थितिः कर्मत्वादिविशेष्यको गोत्वाद्यवच्छिन्नप्रकारकः शाब्दबोधः तत्स्थलीयसामग्रीलक्षणाधीनपदार्थो
पस्थितेरध्याहारात्मकोपस्थितिसाधारणरूपमात्रेण हेतुतामते कर्मत्वाद्युपस्थापकविभक्तिप्रकृतिभूतपश्वादिपदाद्यत्र न
गोत्वावच्छिन्नोपस्थितिरपि तु निराकांक्षपदांतरादनुमानादितोपि वा तत्राप्यक्षतैवेति तादृशशाब्दबोधस्य तत्रापत्तेर्दुर्वारत्वा
त् अर्थाध्याहारमतेपि यत्र साकांक्षपदान्नप्रकृतवाक्यार्थघटकस्याप्यर्थस्योपस्थितिस्तत्र शाब्दबोधोत्पत्तेरनिष्टत्वादिति चे
न्न शक्तिलक्षणासाधारणस्यानतिप्रसक्तवृत्तित्वस्य दुर्वचतया शक्तित्वशाक्यसंबंधत्वाभ्यामेव तयोर्निवेशनीयतया शक्तिल
क्षणाधीनपदार्थोपस्थित्योः कारणताभेदस्य व्यक्तिशक्तिवादिनामप्यावश्यकतया शक्त्यधीनपदार्थोपस्थितेस्तद्धर्मगृहीतशक्ति राम ६१

कस्थलेऽन्वयबोधानुपपत्तिमित्यभिप्रायत्वान्निराकुरुते सर्वेति अत्रेति अथेत्यादिशंकायामित्यर्थः पश्वादिपदस्यापि लोमत्वादावेव शक्तिः लाघवात् फलवत्वा

लोमत्वादिविशिष्टावच्छिन्नविषयकशाब्दबोधत्वं तज्ज्ञानकार्यतावच्छेदकं न च लोमपदपशुपदयोः पर्यायत्वभ्रमदशायां लोमादिप्रकारकशाब्दबोधापत्तिरिति

कपदज्ञानजन्यतद्धर्मप्रकारकोपस्थितित्वेनैव तद्धर्मप्रकारकशाब्दबोधहेतुतायाः कल्पयितुमुचितत्वात् न च तद्धर्मावच्छिन्नवि
षयतानिरूपितशक्तिविषयताशालिज्ञानत्वेन व्यक्तौ शक्तिलक्षणाग्रहयोर्व्यक्तिशक्तिवादिमतेऽनुगमः संभवति गोसंबंधिशक्तं पद
मित्याकारके पदशक्यसंबंधिनी गौरित्याकारके वा लक्षणाग्रहेऽपि गोत्वावच्छिन्नविषयतायाः समं परंपरया शक्तिविषयताया निरू
प्यनिरूपकभावसत्त्वादिति वाच्यं साक्षान्निरूपितत्वपरंपरयानिरूपितत्वयोरनुगमकरूपाभावात् यत्तु वृत्तिसंसर्गकपदप्रकार
कज्ञानमेव शाब्दबोधोपयोगी एवं च शक्तिसंसर्गतानिरूपकपदप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यताशालिज्ञानत्वेन तद्धर्मा
वच्छिन्नविशेष्यकशक्तिलक्षणाज्ञानयोरनुगमः संभवत्येव शक्यसंबंधेनार्थेऽपि पदप्रकारकग्रहस्यापि तथात्वात् संसर्गताव
च्छेदकीयविषयतायामपि संसर्गतात्वसत्त्वादिति तदसत् शक्तिकालीनत्वादिसंबंधावगाहिज्ञानवारणाय पदप्रकारत्वार्थविशे
ष्यत्वोभयनिरूपितशक्तिनिष्ठसांसर्गिकविषयताया निवेशस्यावश्यकतया शक्तिसंसर्गकज्ञानसंग्राहकेण रूपेण लक्षणाग्रहासं
भवात् अथ धर्मशक्तपदस्य धर्मिस्मरणशाब्दबोधजनकत्वे लोमाद्यात्मकोपाध्यवच्छिन्नबोधकपश्वादिपदस्यापि धर्मिशक्तिर्वि
लीयेतातो युक्तेः साम्यात् न च निर्विकल्पकरूपस्य स्मरणस्य शाब्दबोधस्य चानभ्युपगमाज्जातिवाचकपदाद्व्यक्त्यविषयकस्मरणा

वाच्यं ज्ञानशक्तिस्वीकारेण दोषात् यत्तु तादृशपर्यायत्व भ्रमदशायां लोमादिमुख्यविशेष्यकशाब्दबोधो न स्यादित्याशंक्यापर्यायताशक्तपशेद इति यत्कि

श०वा० ६२ क्ति ज्ञानस्य विशेष्यत्वे लोमत्वमुख्यविशेष्यकशाब्दबोधहेतुत्वोपगमात् तदभावस्य च लोमप्रकारकशाब्दबोधे हेतुत्वादिति तच्छिष्यप्रतारणामात्रं धर्म्योप क०टी०

द्यसंभवेन तस्य व्यक्तिस्मरणादिजनकत्वं धर्म्यविषयकस्यापि च लोमत्वाद्यवच्छिन्नविषयकस्मरणादेः संभवात् अश्वादिपदस्य लोमत्वाद्यवच्छिन्नवाचकत्वोपगमेन धर्मिधीः संभवतीति न तस्य धर्म्यवाचकतेति वाच्यं उपाधेर्धर्मिविनिर्मोकेण भानसंभवरूपस्य जात्यपेक्षया विशेषस्य सत्वेपि जातिशक्तपदज्ञानस्य जातिप्रकारिकायामिवोपाधिशक्तपदज्ञानस्याप्युपाधिप्रकारकधर्मिविषयकबुद्धौ कारणताकल्पने बाधकविरहात् उपाधिमात्रशक्तादपि धर्मिधीसंभवादिति चेन्न लोमत्वाद्यवच्छिन्नसंबंधांतरवत्तया गृहीतात् लोमत्वादिना लोमादिमुख्यविशेष्यकस्यैव स्मरणस्य बाधकांतरविरहदशायामुत्पादनात्तद्रूपावच्छिन्नशक्तत्वेन गृहीतात्तद्रूपावच्छिन्नप्रकारकधर्मिस्मरणस्य नियमतः स्वीकारेऽनुभवविरोधात् अविशेषित गोत्वादेः संबंधांतरज्ञानादपि धर्मिविषयकेबोधे न तत्प्रकारकधर्मिस्मरणस्यैवोपगमेन तादृशस्य तस्य तादृशशक्तिसंबंधज्ञानात्तत्प्रकारकधर्मिस्मरणोपगमेऽनुभवविरोधविरहात् अत्रेष्टापत्तेरपि सुकरत्वेन प्रतिबंदेर्वादिनिवर्तकत्वायोगाच्च अथ गवादिपदस्य समवायाविशिष्टवाचकत्वोपगमे तज्जन्यबोधे गोत्वादेः समवाय एव संसर्गतया भासते न तु संबंधांतरमित्यत्र किं नियामकं (वाच्यानंतर्भावस्य समवायसाधारण्येन संबंधांतराभानप्रयोजकत्वासंभवात्) न हि जातिर्व्यक्तिं विना न भासत इति वत्समवायं विना राम

ताज्ञानस्य न्यायादिमते द्वयोः पदयोऽस्तद्धर्मावच्छिन्नशक्तिमत्वज्ञानादिपदत्वात् कालीनस्य विशिष्टशक्तिज्ञानस्य सर्वमते लोममुख्यविशेष्यकलो ६२

मप्रकारकफलजनकतयाभवन्मते तदनुपपत्तेः अशंकाया एवाशुद्धत्वात् पर्यायताभ्रमस्य पशुपदं लोमवच्छ क्रमित्याकारकतया लोममुख्यविशे
ष्यकशाब्दबोधे बाधकाभावादिति ॥ ॥इतिश्रीरंगनाथसूरिसूनुनारायणानुजकृष्णभट्टविरचितं शक्तिवादविवरणं संपूर्णं॥ ॥वाराणसीप्रसा
दस्य नियोगेन तु यत्नतः काशीसंस्कृतमुद्रायामंकितोयं विचक्षणैः १ काश्यां त्रिपुरभैरवीसन्निधौ श्री ३ युत बाबूफतहनारायणसिंहजी स्वभिधा युजो

पिन भासत इत्यपि नियमः येन शक्तिज्ञानजन्यबोधे समवायभानस्यावश्यकता न तु संबंधांतरभानमिति स्यात् तदा दिपदात्समवाय
मविषयीकृत्यापि संबंधांतरेण गोत्वादिविशिष्टविषयकबोधोदयादिति चेदेवं सति ज्ञानशक्तिरेवादरणीया तथा च गवादिपदस्य स
मवायेन गोत्वादिप्रकारकज्ञान एव शक्तेरुपगमात्तेनाभ्रांतानां संबंधांतरेण तत्प्रकारकधीः न तु संबंधेन तत्प्रकारकज्ञाने शक्तिग्रह
स्यैव तादृशबोधहेतुत्वमिति वाच्यानंतभावस्य समवायसाधारणसंबंधांतरभानप्रयोजकत्वासंभवादिति कृतं पल्लवितेन ॥ छ॥
इति श्रीगदाधरभट्टाचार्यविरचितः शक्तिवादः समाप्तः ॥ ॥ ॥छ॥ ॥ ॥ ॥छ॥ ॥ ॥ ॥छ॥

निकेतने काशीसंस्कृतमुद्रायन्त्रेऽङ्कितोयम् ॥ ज्येष्ठे मासि सिते पक्षे नवम्यां तु भृगोर्दिने अलेखि विष्णुपन्तेन त्रिपुरेश्वरिसन्निधौ १ गुरुपादाब्जभृंगेण
रमानाथेन धीमता सव्याख्यः शक्तिवादाख्यः शोधितो हि प्रयत्नतः २ काशीजी में श्री ५ युत बाबू बनारसीप्रसाद के संस्कृतमुद्रायन्त्र में मंजूषासहित शक्तिवाद
अत्यंत उज्वलतापूर्वक छापा गया शोधनेवाले रमानाथ शास्त्री लिखनेवाले विष्णुपंत दमोहवाले छापनेवाला दरसनकारीगिर यह ग्रंथ जिसको लेना हो यह उसको
कुं जगली के पश्चिम फाटक के सामने सीताराम के दुकान में मिलेगा अथवा त्रिपुरभैरवी के समीप बाबू फतहनारायणसिंह के मकान में बनारसीप्रसाद के छापखाने में मि

॥ इति मंजूषासहितशक्तिवादः समाप्तः ॥